


**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(12): 92-98
www.allresearchjournal.com
Received: 17-10-2016
Accepted: 19-11-2016

**बृजभूषण शर्मा**
(शोधच्छात्रः, S.R.F. संस्कृतविभागः,
राजस्थानविश्वविद्यालयः, जयपुरम्,
राजस्थानम्

**Correspondence**
**बृजभूषण शर्मा**
(शोधच्छात्रः, S.R.F. संस्कृतविभागः,
राजस्थानविश्वविद्यालयः, जयपुरम्,
राजस्थानम्

# जयकृष्णभट्टः तस्य कौमुदीविलासः

**बृजभूषण शर्मा**

मध्यसिद्धान्तकौमुद्याः व्याख्यायाः कौमुदीविलासस्य कर्त्ता जयकृष्णः। अस्य च पितुः नाम रघुनाथः पितामहस्य च नाम गोवर्द्धन आसीत्। अयं कौमुदीविलासकारः जयकृष्णः अस्य ग्रन्थस्य आरम्भे दुर्गास्तुतिं विधाय स्वीयवंशपरिचयम् एवं वर्णयति–

प्रणौमि दुर्गां परमार्त्तिहन्त्रीं; सर्गस्थितिप्रच्यवमूलकर्त्रीम्।
अनादिमायां परमां विचित्रां; तदङ्कखेलन्तमिभास्यदेवम्।।
अभूद्द्विजेन्द्रः शिवराजधान्यां गोवर्द्धनो मौनिकुलाब्धिचन्द्रः।
निवारितद्वैततमः प्रचारो नृपादिभिः पूजितपादपद्मः।।
तस्माद्द्विजाग्रो रघुनाथनामा बुधः समाराधितशम्भुपादः।
तर्कादिशास्त्रोदधिकर्णधारो बभूव मान्योऽखिलभूपतीनाम्।।
रघुनाथतनूजेन जयकृष्णेन धीमता।
मध्यसिद्धान्तकौमुद्या विलासोऽयं वितन्यते।।

एवञ्च प्रत्येकं प्रकरणस्य अन्ते स्वीयपरिचयम् इत्थं विदधाति–
''श्रीमन्मौनिकुलतिलकायमानगोवर्द्धनभट्टाङ्गजरघुनाथभट्टसूनुजयकृष्णभट्ट- कृत मध्यसिद्धान्तकौमुदीविलासे संज्ञाप्रकरणं समाप्तिमगात्''। एवमेव अन्यप्रकरणानामन्तेऽपि एवंविधो वंशपरिचयः द्रष्टुं शक्यतेऽस्य विदुषः। अनेन वाक्येन सुस्पष्टरूपेण विज्ञायते अस्य महानुभावस्य वैयाकरणधुरन्धरस्य जयकृष्णस्य वंशपरम्परा।

## कौमुदीविलासः

सुशब्दव्रातश्रीकुमदवनविद्योतनकरी सदा सद्व्युत्पत्तिप्रसरणपरानन्दनझरी।
कुशब्दध्वान्तस्य प्रसभमभिविध्वंसनकरी कृतिर्भूयादेषा बुधजनमनः प्राङ्गणचरी।।

परमकारूणिको जयकृष्णभट्टः संस्कृतव्याकरण-जिज्ञासूनां व्याकरणसिद्धान्त- ज्ञानमनल्पेन यत्नेन प्रापयितुमनल्पयत्नसाध्यामन्वर्थां मध्यसिद्धान्त-कौमुदीं व्याख्यातुमयतत। विदितमेव विश्वेऽस्मिन् विश्वे वैयाकरणसिद्धान्तकौमुद्याः सर्वविधसंस्कृतशब्दसाधुत्वमाहात्म्यम्। सा च कौमुदी प्रौढ़ायुवति-रिव अल्पज्ञानां यूनां मनांसि स्वीयविषय-गाम्भीर्येण न आकर्षयति। अतः खलु बहवो तां दृष्ट्वा बिभ्यति। तत्प्रदिपादितसिद्धान्ताश्च अल्पबुद्धीनामस्मदादीनां दुर्गमाः सञ्जाताः। ततः भट्टोजिदीक्षितशिष्येण वरदराजेन मध्यसिद्धान्त-कौमुदी लघुसिद्धान्तकौमुदी नामकग्रन्थौ विनिर्मितौ तत्र लघुसिद्धान्तकौमुदी सिद्धान्तानां लाघवात् विषयाणाञ्च अनतिगभीरत्वात् बालेव यूनः न आकर्षति। अन्यतमा खलु मध्यसिद्धान्तकौमुदी मुग्धेव यूनश्चेतांसि बहुधा आकर्षयति। सामान्य-संस्कृतज्ञः कोऽपि अनायासेन यत्नेन प्रधानान् सिद्धान्तान् बहूँश्च विषयान् अवगन्तुमर्हति। इत्येवं विज्ञाय तत्र भवान् जयकृष्णः वैयाकरणसिद्धान्तकौमदीं लघुसिद्धान्तकौमुदीञ्च

परित्यज्य मध्यसिद्धान्तकौमुदीं व्याख्यातुमयततेति। अयं विज्ञः इमां कौमुदीमकठिनया भाषया यथाविषयं यथावसरं यथासिद्धान्तं व्याख्यातवान्। प्रयोजन-मनुद्दिश्य न मन्दोऽपि प्रवर्तते इति लोकोक्तिमनुसरन् व्याकरणाध्ययनप्रयोजनानि तत्रादौ सर्वत्र एतन्मूलग्रन्थेषु अस्थितान्यपि उल्लिखति। इमानि च प्रयोजनानि न क्वापि मूलग्रन्थेषु तद्व्याख्यासु वा दृश्यन्ते, यदि सन्ति क्वचिच्चेत् चेदपि आदौ नैव वर्तन्ते। आधुनिक-कालप्रभावं विज्ञाय खलु अनवगाः महाभाष्य-स्थित-प्रयोजनानि सुलभतया ज्ञेयानि इति। ततः व्याकरणाध्ययने मनः सोत्कर्षं प्रसरति इति। आदौ एव अत्र बालानां मोदकमिव संस्थापितानि। अनेन च धीमता भाष्यादिग्रन्थपर्यालोचनं सम्यग-कारीति एतद् परिलोकनेनैव स्फुटं प्रतीयते। प्रदीपवाक्यपदीयादिग्रन्थेषु अतिविस्तृतविषयान् प्रयोजनानि च अनेन महाभागेन सरलया भाषया अत्र विवृतानि। यथा-

ननु ग्रन्थादौ श्रोतृ प्रवृत्तये प्रयोजनादि वक्तव्यं। तदुक्तं- ''सिद्धार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।

**शास्त्रादौ तेन वक्तव्यः सम्बन्धः स प्रयोजनः।।** इति ग्रन्थादौ वक्ति। ततः प्रयोजनकथनं स्वमूलग्रन्थे न कृतमिति शङ्कामन्वर्थतां तन्नाम्नः प्रतिपाद्य प्रयोजनमपि कथितमेवेति मूलकर्त्तुः समर्थनं करोति। ''तत्तु मध्यसिद्धान्तकौमुदी इत्यनेनैव सूचितम्'' इति कथनेन एवं करणात् मूलकर्तुः एवं देवता-नमस्काररूपमङ्गलमत्र नास्ति इति न्यूनतामपि भागवत सहायेन पूरयति। यथा-

देवता नमस्काराकरणं तु गुरुदेवतयोः ऐक्यं- अभिप्रायेण, गुरुदेवतयोः ऐक्यं तु'' ''आचार्यं मां विजानीयात्'' इति भागवते प्रसिद्धमिति कथनेन। ततः प्रयोजन-विषये ''प्रकृतिप्रत्ययविभागेन शब्दव्युत्पादनं ब्रुवता सिद्धान्तशब्देन महाभाष्यकारोक्तं साक्षात्प्रयोजनं शब्दानुशासनं सूचितम्'' इति प्रयोजनानुक्त-न्यूनतामपि मूलकर्त्तुरपनयति। शब्दानुशासनस्य च प्रकृतिप्रत्ययादिविभागेन शब्दव्युत्पादनमिति लक्षणमपि निर्वक्ति। एवं प्रयोजनविषयसम्बन्धाधिकारीत्वेन प्रसिद्धं सम्बन्धचतुष्टयमपि स्पष्टं विवृणोति। ततश्च महाभाष्योक्तप्रयोजनप्रयोजनानि आनुषङ्गिकप्रयोजनानि च तदध्ययनभीरुभ्यः अत्रैव वर्णितानि। ये च व्याकरणाध्ययनारम्भावस्थायां सन्ति महाभाष्यकैयाटादिग्रन्थपरिशीलनक्षमारहिताः तेषामपि तदुक्तप्रयोजनानि अस्मादेव ज्ञायन्त इति व्याकरणाध्ययनासक्ति वर्धनार्थं व्याख्यात्रात्र तानि निर्दिष्टानि इति विज्ञेयम्। अतश्च तत्रत्यं अपेक्षितविषयं सर्वमपि अत्र सः निगदति। अतिविस्तृतकैयटव्याख्यामपि सम्यगवगच्छन् खलु अयं यथोचितं विषयं उपस्थापयति। यथा-

''रक्षोहागमलघ्वसन्देहा प्रयोजनमिति''। अत्र प्रयोजयतीति कर्तृव्युत्पत्या बाहुलकात् ल्युटिप्रयोजनशब्दः पुल्लिङ्गपरः इति तैः व्याख्यातम्। अत्र व्याख्यायां ''रक्षा-वेदसंरक्षणम्। तथाहि भाषायामदृष्टलोपागमवर्णविकाराः छन्दसि दृश्यन्ते। ते केवलं प्रयोगशरणैः प्रामादिकाः संभाव्येरन्। वैयाकरणस्तु लक्षणदर्शी तदेव रूपं स्थापयतीति रक्षापदस्य भाष्यकारविवक्षितभावं स्पष्टं प्रतिपादयति। कैयटप्रदीपयोस्तावत् अयमेव विषयः प्रौढ़मनोरञ्जकतयैव तदीयव्याख्ययोः निदर्शितः। एवमेव बहुत्र तदीयवाक्यान्यपि दृष्टान्तं विवरयितुं गृहीतानि। तथा ऊह विषयेऽपि- ''ऊहोऽपि प्रयोजनम्'' तथाहि यत्राङ्गजातं सम्पूर्णमुपदिष्टं सा प्रकृति तथा-दर्शपूर्णमासौ। यत्र न उपदिष्टं सा विकृतिः। यथा सौर्यं चरू निर्वपेत ब्रह्मवर्चस्कामरिति।'' इति सावतरणं सुष्ठुप्रतिपादिनमकार्षीत्। अत्रैव विषये अनेन मीमांसा ग्रन्थपरिशीलनसहितं प्रदीपोद्योतव्याख्याद्वयं स्वीकृत्य सारभूतं तत्त्वं उदलिख्यत। एवमेव इतरत्र अवशिष्टेषु सर्वेष्वपि प्रयोजनप्रयोजनेषु आनुषंगिकप्रयोजनेषु च ग्रन्थनामानुगुणं विवेचनं कृतमनेन। ततः परं प्रकृतग्रन्थव्याख्यातुकामः सर्वव्याकरणमूलभूतमाहेश्वरसूत्राणि ग्रन्थादौ कृतानि परामृशन् तत्र जायामानशङ्कां निरस्यति। यथा-अत्र सन्ध्यकरणम् असन्देहार्थम्। अर्थस्य अविवक्षितत्वात् विभक्तेरनुत्पत्तिः। छान्दसो वा सुब्लुक्। छन्दोवत्सूत्राणि भवन्तीति सूत्राणां छान्दसत्वात् इति। व्याख्यास्यमानग्रन्थस्य नाम्नो अनुगुणं शङ्कामिमां निवारयति। मनोरमादिग्रन्थेषु एतद्विषये अनल्पमेव चर्चितम्। अत्र तदस्पर्शस्य व्याख्याकर्तुः जयकृष्णभट्टस्य अज्ञानं हेत्विति नैव विभावनीयम्। अग्रे बहुसूत्रव्याख्यावसरेषु तत्तद्विषयसारस्य स्पष्टीकृतत्वात्। ततः परं माहेश्वरसूत्रेषु इत्संज्ञावर्णान् वक्तुकामो अयं प्रत्येकं सूत्रस्थेन इत्संज्ञावर्णेन यावन्तः प्रत्याहाराः पाणिनिना अभीप्सिताः तान् सर्वान् संख्यातः गणयन् प्रत्येकं इद्वर्णस्य एकैकं पाणिनेः सूत्रमपि उदाहरति। एतद् तावत् अस्य युवसु कारुण्यस्य निदर्शनम्। यथा-अक्-अकः सवर्णोदीर्घः एवमेव रॅप्रत्याहारसिद्धिप्रकरणं हकारस्य द्विरुपदेशप्रकरणञ्च सोदाहरणं विवृणोति। ततश्च ''हलन्त्यम्''[1] इति सूत्रं व्याख्यातुं तत्र अनुवर्त्यमान इत्पदं ''स्वरितिनाधिकारः'' इत्यनेन विवृणोति। स्वरितगुणयुक्तत्वात् इत्पदस्य अनुवृत्तिर्भवतीति मूलकृतो अपेक्षितार्थविवरणं करोतीति। ततश्च ''हलन्त्यम्'' सूत्र-वेलायां जायमानः अन्योन्याश्रयदोषञ्च मूलकृत अर्थमपि अनुक्तमस्पृष्टं चेदपि तस्य दोषस्य अवश्यं भाव्यत्वात्। तदा अपरिहारेण हलन्त्यमूलकस्यास्य ग्रन्थस्यापि अनवगमः स्यादिति मनसिकृत्य अन्योन्याश्रयदोषं प्रदर्शयन् तत्परिहारमपि प्रादर्शयत्-अत्र इयान् विशेषः मनोरमादिग्रन्थेषु एतद्दोषपरिहरणाय या रीतिराश्रिता सैव अन्वसारि। यद्यपि ज्ञापकान्तरेण अन्योन्याश्रयदोषपरिहारः वक्तुं शक्यते तथापि ''सूत्रावृत्तिरेव लघीयसी'' इति शब्दरत्नोक्तलाघवं पुरस्कृत्य तदेव समाधानत्वेन अत्र विहितम्। ततः उपदेशशब्दव्याख्याऽवसरे उपदेशशब्दस्य आद्योच्चारणमित्यर्थः कथमायाति इति कथयन् ''उपदेशशब्देन आद्योच्चारणं कथं लभ्यते इति चेत् श्रृणु-उपशब्दः आद्यर्थः। ''प्रोपाभ्यां समर्थाभ्या''मिति सूत्रे तथात्वावगमात्। दिशिरूच्चारणक्रियरिति भाष्यं ततो भावे घञ्। उप आद्यं देशः उच्चारणम् आद्योच्चारणमित्यर्थ'' रिति मनोरमोक्तं सिद्धान्तं उपदेशशब्दस्य भावघञन्तत्वं विवृत्य ''तच्चिन्त्यमिति'' आरभ्य शब्दरत्नादि-सर्वसिद्धसिद्धान्तम् उपदेशशब्दस्य करणघञन्तत्वं स्पष्टीकृतवान्।

''अदर्शनं लोपरि''[2]ति सूत्रार्थं भाष्यवृत्तिमनोरमाशेखरादि परिशीलनेन स्पष्टोपपत्त्या उक्तवान्। ये च विषयाः भाष्यारूढ़ाः ये च विषयाः मनोरमास्थाः ये च विषयाः शेखरस्था तान् सर्वान् अर्थतः सम्बद्धयन उपावर्णयत्। स्वं रूपं शब्दस्य इति वचनात् अदर्शनमिति आनुपूर्व्याः लोपसंज्ञा भवेदिति सामान्यतया एवं जायमानां शङ्कां निरस्यति यथा- ''ननु स्वं रूपं शब्दस्याशब्दसंज्ञा इति वचनात् अदर्शनशब्दस्य लोपसंज्ञा

---

[1] अ. सू. सं. 1/1/3

[2] अ. सू. सं. 1/1/60

स्यात्। ततश्च लोपविधौ अदर्शनशब्देव आदेशः स्यादिति चेत् सत्यं-टि-घु-भादिवत् लाघवात् एकाक्षरायां संज्ञायां कर्त्तव्यायां महासंज्ञाकरणं अन्वर्थसंज्ञाविज्ञानार्थं लोपनं लोप इति। न च अदर्शनशब्दः लोपनक्रिया इति तस्य न भविष्यति'' इति प्रायः बालमनोरादिव्याख्यासु अनुपस्थापिता अवश्यं भीविनी च इयं शङ्का अनेन कृता तत्समाधानमपि भाष्यारुढत्वेन उक्तम्। एवं भाष्यरीत्या सरलाभिः पंक्तिभिः सूत्रमिदं व्याख्यातम्। तत्परं ''तस्य लोपरिति[3]'' सूत्रमपि प्रौढमनोरमादिषु अव्याख्यातमपि स्पष्टप्रतिपत्तये व्याख्यात्। तत्र हि ''उपदेश इति सूत्रात् इत्पदमनुवर्तत इति तस्य इतः लोप' इति सूत्रितेऽपि अन्वयसम्भवेन इद्वर्णस्येव लोपे सिद्धे पुनस्तस्य इति सूत्रे कथनं यावत् समुदायस्य इत्संज्ञा तावत् समुदायस्य सर्वस्यापि लोपविधानार्थम्। सूत्रे तस्येति पदाभावे ''अलोऽन्त्यस्ये''ति परिभाषया केवलमन्त्यस्यैव लोपः भवतीत्यर्थः स्यात्। तथा सति ङि डु इति समूहस्य इत्संज्ञायां अन्त्यस्य इकारस्य, उकारस्यैव लोपः स्यात् ङिइत्यादिसमुदायस्य न स्यात्। अतः तस्येति आवश्यकम्। यदि तु नानार्थकेऽलोन्त्य-विधिरनभ्यासविकारे इति परिभाषा आश्रियते तर्हि तस्येति अनपेक्षितमेव। सूत्रकारेण तु इयं परिभाषा नाश्रिता एव अत एव तस्येति पदं सूत्रे कृतम्।'' इदं व्याख्यानं न क्वापि व्याख्यासु दृश्यते। यद्यपि शेखरे एतद् सदृशव्याख्योपलभ्यते तथापि तद्भिन्नैवेयम्। माहेश्वरसूत्रेषु इत्संज्ञावर्णानां प्रयोजनं कथयन् पुनरयमितरव्याख्यासु अप्रसिद्धं शङ्काविशेषमेव प्रस्तौति। तथा हि मध्यसिद्धान्त-कौमुद्याः पंक्तिः णादयोऽणाद्यर्थारिति। तस्य व्याख्यां कुर्वन् अयं ''न चैवमपि उपदेशानन्तरमेवैषां लोपात् तदसिद्धिरिति वाच्यम्। काकादिवत् स्मर्यमाणानामपि आदिव्यवहारहेतोत्वपपत्ते। अन्ये तु यस्मिन् प्रत्याहारे योऽनुबन्ध उपादीयते तस्य तत्रोपादानबलात् लोपाभाव इत्याहुः'' इति भणति। अस्य कथनस्य अयम् आशयः महाभाष्ये ''प्रत्याहारे अनुबन्धानां कथम् अज्ग्रहणेषु न'' इत्याशङ्का कृता तस्याः शङ्कायाः आचार्यदप्रधानात्वात् लोपश्च बलवत्तरः इति समाधानत्रयमुक्तम्। तत्र इत्संज्ञावर्णानां लोपो बलवत्तरो भवतीति अच् प्रत्याहारनिष्पत्तेः प्रागेव इत्संज्ञावर्णानां लोपो भवतीति तेषामच्प्रत्याहारे ग्रहणं न भवतीति तृतीयं प्रकृतं समाधानम्। तत्र भाष्ये लोपस्य बलवत्तरत्वोक्त्या माहेश्वर-सूत्रेषु विद्यमानानामित्संज्ञावर्णानां समनन्तरमेव लोपो भवतीति तेषामदर्शनत्वात् कथं वाणादयः प्रत्याहाराः सिद्धेयुः? इति। तस्याः शङ्कायाः अस्यामेव व्याख्यायां पक्षान्तरेण समाधानद्वयमपि पूर्वमेव उक्तम्। तत्र प्रथमसमाधानं यथा-कश्चित् मनुजः काकवत् देवदत्तगृहम् इति सूचितं चेत् गतेऽपि काके पूर्वस्मृतधिया लिङ्गादिभिर्वा देवदत्तगृहं प्राप्स्यति तथा अत्रापि इत्संज्ञकस्य वर्णस्य लोपेऽपि तद्-तद्-वर्णधिया प्रत्याहार निष्पित्तौ न कापि विप्रतिपत्तिः इति आशयः। यदि त्वत्र गते काके तद्धीरपि न भवति इति उच्येत तद्वत् अत्रापि प्रत्याहार सिद्धिर्न स्यात् इति आशङ्क्य व्याख्यायामेव द्वितीयसमाधानमुक्तम्- ''अन्ये तु'' इति आरभ्य। यस्मिन् प्रत्याहारे अस्माभिः चिकीर्षते तत्र यो अनुबन्धः अकारादिः तस्य तत्तदणादिप्रत्याहारोपादानबलात् लोपो न भवतीति न तेषां लोपो भवति। ऊकालोजिति[4] सूत्रेऽपि अयं धीमान् इतर-व्याख्यासु अदृश्यमानामेवोपपत्तिं स्वयुक्तिभिः उपपादितवान्। ह्रस्वदीर्घप्लुत इत्यनेनाऽपि सर्वनामस्थानेति महासंज्ञावत् एकैव संज्ञाविधीयतामित्याशङ्क्य भाष्यादीनमुक्तिभिः परिहरति। तथा च भाष्ये ''लघत्रर्थं संज्ञाकरणं'' ''आवर्त्तिन्य संज्ञाः भवन्ति'' इति उक्तं वृद्धिसंज्ञाविषये ''वृद्धिरादैच'' सूत्रे। प्रकृतेऽपि ह्रस्वदीर्घप्लुतः इति एतस्याः लघुत्वाऽभावात् अन्वर्थताऽपि नास्ति इति हेतोः इयं एकैव संज्ञा न इति ज्ञायते। एवमेव केवलं ह्रस्वशब्दो वा दीर्घर्शब्दो वा प्लुतशब्दो वा अष्टाध्याय्यामावर्तते न तु ह्रस्वदीर्घप्लुतशब्दः अतः एताः पृथक्-पृथक् संज्ञाः एव इति ज्ञायते। अत एव संज्ञिनोऽपि त्रय इति अनुमीयते। अत एव अस्य सूत्रस्य वृत्तौ वामिति बहुवचन-निर्देशः कृतः। एवं रीत्या वृत्तौ विद्यमान-पदानामुपपत्तिः नेतरत्र व्याख्यासु लभ्यते। एवमेव एकमात्राकालिकस्यैव ह्रस्व इति। द्विमात्रा-कालिकस्यैव दीर्घ इति। त्रिमात्राकालिकस्यैव प्लुत इति संज्ञाः इति प्रतिपत्तुं ''यथासंख्यमनुदेश-समानामि''ति सूत्रमपेक्षितम्। तत्सूत्रमत्र प्रकरणे अनुक्तमेवेति तदसमीचीनमेवेति वैयाकरणद्धिान्तकौमुद्याः बालमनोरमाव्याख्यायां यथासंख्येति सूत्रमिहैव उपन्यसितुमुचितम् इति ग्रन्थकर्तुः दीक्षितस्य न्यूनता दर्शिता। परं मध्यसिद्धान्तकौमुद्यां यथासंख्येति सूत्रमस्मिन् प्रकरणे अनुक्तं चेदपि ज्ञापकादिना एकमात्रिकस्यैव ह्रस्व इति द्विमात्रिकस्य दीर्घ इति त्रिमात्रिकस्यैव प्लुतः इति संज्ञाः ज्ञापकादिना व्याख्यात्रा साधिता। वरदराजस्य यथासंख्यासूत्राऽनुक्तन्यूनतारूपदोषः परिहृतः, तेनास्मिन् प्रकरणे यथासंख्यसूत्रमनुक्तं चेदपि न कश्चिद्-दोषः एव। तत् ज्ञापकादिकञ्च अत्रैव व्याख्यायां स्फुटम्।

तुल्यास्यप्रयत्नं[5] सवर्णम् इति सूत्रमपि अयं -

धीमान् सम्यक् विवेचितवान्। अत्र सूत्रे प्रयत्न-शब्देन आभ्यन्तराः एव यत्ना गृह्यन्ते चेदपि प्रशब्दवशात् यत्नप्रसंगपुरस्सरं बाह्य-प्रयत्नान्.अपि वरदराजः मध्यसिद्धान्तकौमुद्यामस्मिन्नेव सूत्रे न्यदर्शयत्। यद्यपि कौमुद्यां बाह्यप्रयत्नविवरणं पूर्वत्रासिद्धमिति सूत्रानन्तरं विहितं तथापि तुल्यास्य सूत्र एव प्रयत्नशब्दो वर्तत इति अत्रैव तेषां विवरणं मध्यसिद्धान्तकौमुदीक्रमरीत्या उचितम्। अत एव जयकृष्णोऽपि अननैव क्रमेणन तान् प्रयत्नान् विशदयति। तत्र बाह्यप्रयत्नानां विषये बालावबोधाय सुगमं व्याख्यानं तथा न दृश्यते इति मनसि निधाय अयं महान् प्रत्येकमपि बाह्य-प्रयत्नं बालावबोधाय स्पष्टयति यथा-

''बाह्य प्रयत्नास्त्विति'' - बाह्यत्वञ्च वर्ण निष्पत्ति-काला ऊर्ध्वं वायुवशेन उत्पत्तेः इति। अस्य अयं आशयः यदा यः कश्चन् मनुजः वक्तुमिच्छन् सन् अर्थान् बुद्ध्या समेत्य मनः युङ्क्ते। तच्च मनः कायाग्निम् आहन्ति। स च अग्नि वायुं प्रेरयति। तथा प्रेरितः वायुः उदरात् उर्ध्वमभिगत्य मूर्ध्नि अभिहतः सन्नधः आयाति तथा आगतः वायुः मुखात् बहिर्निर्गच्छन मुखे विद्यमानानि ताल्वादीनि स्थानानि यथा-विवक्षं ताडयति। तदा प्रत्येकं शब्दः तत्तस्थाने जातस्सन् वर्णत्वेन बहिः आयाति। एतदेव उच्चारणं नाम। अस्मिन्कर्मणि वायोः मुखात् बहिः आगमानन्तरं ये यत्नाः जायन्ते ते एव बाह्यप्रयत्नाः इति कथ्यन्ते। इति। अयं सर्वोऽपि विषयः अनेन लघुना यत्नेन सूचितः तथा ''तत्र यदा गलविलस्य संकोचः तदा संवारः यदा तस्यैव विकासः तदा

[3] अ. सू. सं. 1/3/9

[4] अ. सू. सं. 1/2/27

[5] अ. सू. सं. 1/1/9

विवारः, संवृते गले विले व्यक्तः शब्दः नादः, विवृते गलविले व्यक्त शब्दः श्वासः, श्वासनादौ अनुप्रदानमित्याहुः अनुपश्चात् प्रदीयते इति। तत्र यदा स्थानाभिघातजे ध्वनौ नादोनुप्रदीयते तदा नादः ध्वनिसंसर्गात् घोषो जायते। यदा श्वासो अनुप्रदीयते तदा श्वासध्वनिसंसर्गात् अघोषः'' इति। एतादृशः स्पष्टः अर्थः एतेषां बाह्यप्रयत्नानां न कस्यामपि व्याख्यायां उक्तः। एतत्पठनेन अवश्यम् एतद् अर्थः अनुभवेन ज्ञायते इति स्पष्टमेव। एवमेव अल्पप्राणः महाप्राणादीनां विषयेऽपि अनेन स्पष्टः अर्थः उक्तः। यथा– ''महती वाय्वौ महाप्राणः, अल्पे अल्पप्राणः। यस्योच्चारणे गात्राणां निग्रहः रूक्ष्यता स्वरस्य संवृतता कण्ठविलस्य स उदात्तः। यस्योच्चारणे गात्राणां मार्दवं स्वरस्य स्निग्धता कण्ठविवरस्य महत्त्वं सोनुदात्तः। उदात्तानुदात्तसम्बन्धात् स्वरितः इति। अत्र पाणिनीयसूत्राणि मनसा पश्यन् स्वानुभवेन उदात्रदिषु स्वरेषु उच्चार्यमाणेषु या स्थिते मुखे जायते सा सर्वास्थितिः अनेन न्यदर्शि इति अस्य महिमा।

**अलोऽन्त्यस्य**[6] – इति सूत्रमपि स्वीयसूक्ष्मबुद्धिमुपयु श्रीमान् जयकृष्णभट्टः व्याख्यावतान्। तस्मिन्सूत्रे अलः, अन्त्यस्य इति पदद्वयं वर्तते। आदेशः इति स्थानेति च अनुवर्तते। अल्शब्दे अल इति प्रथमाद्वितीयाबहुवनयोः पञ्चमी-षष्ठ्येकवचनयोः भवतीति। त्रात्रत्यम् अल इति पदं किं विभक्त्यन्तं वा स्यात् इति शङ्का अवश्यमेव जायते एनां शङ्काम् अयं व्याख्याता स्पृष्ट्वा षष्ठयैकवचनमित्येव निर्धारयति। यदि तु प्रथमान्तपदं स्यात् तर्हि अलरूपादेश यत्र विधीयते सः एव आदेश अन्त्यस्य स्थाने भवतीति अर्थः स्यात्। तथा सति लोपरूपादेशः अन्त्यरहितो भवतीति सः अन्त्यस्य स्थाने न स्यात्। अतः षष्ठयेकवचनमेव। इयमपि शङ्का न केनापि व्याख्यात्रा अस्पर्शि। इयं च शङ्का अवश्यमेव भाविनी च। आदेश इत्यनुवृत्त्यभावे इड्रूपागमोऽपि आर्धधातुकस्य इत्यस्य षष्ठी-निर्दिष्टत्वात् तृचः ऋकारात्पूर्वं स्यात्। अतः आदेशः इति आवश्यकम्। एवञ्च षष्ठयन्तस्य विधीयमानं कार्यमदेशरूपमन्त्यस्य अलः स्थाने भवतीति सूत्रार्थः। एवं रीत्या अस्य सूत्रस्य अर्थः अनेन सुस्पष्टतया निर्णीतः तथैव मध्यकौमुद्याः अस्य सूत्रार्थस्य पाठभेदोऽपि न्यदर्शि। यथा क्वचित् ''षष्ठीनिर्दिष्टान्तस्य इति'' समस्तपाठः इति। तस्य अर्थोऽपि अनेनैव उक्तः ''तत्र षष्ठया निर्दिष्टस्य योऽन्त्यः तस्य आदेश स्यादित्यर्थः। अयं भावः स्थानषष्ठीनिर्दिष्टस्य यः आदेश उच्यते तस्य स्थानषष्ठीनिर्दिष्टस्य अन्त्यस्य अलः स्थाने स्यादिति''। एवमेव अन्यस्मिन्पाठेऽपि विद्यमानं वाक्यं उक्त्वा तस्यापि अर्थमुक्तवान यथा– ''तत्र षष्ठ्या निर्दिष्टः – षष्ठीमुच्चार्य-विहितः इत्यर्थः। तत्र अर्थात् तस्यैव अन्त्यस्य इति व्याख्येयम्। तथा च संयोगान्तस्य इति स्थानषष्ठीनिर्दिष्टः लोपः अन्त्यस्य भवतीति''। एवं रीत्या पाठभेदः पुरस्कृतमर्थवर्णनं अनेन कृतम्। अतोऽयं व्याख्याता स्वव्याख्याकर्मणि अत्यन्तं साधु इति प्रतीयते।

चादयोऽसत्त्वे[7] इति सूत्रमपि अनेन सम्यक् प्रतिपादितम्। अस्मिन् सूत्रे असत्त्वे इत्यस्य द्रव्यभिन्नवाचिन इत्यर्थः। तेन द्रव्यभिन्नवाचिन ये चादयः ते निपातसंज्ञा भवन्तीति अर्थः। एतत्संज्ञाया स्वरः, स्वरादिनिपातमव्ययमिति अव्ययत्वञ्च परमं प्रयोजनम्। अत्र इयं शङ्का चम्पठति प्रोपाभ्याम् इति प्रयोगः चम्बद इत्यादि प्रयोगश्च कथं संगच्छत इति? अयमाशयः 'च' इत्यस्य चादित्वात् प्रकृतसूत्रेण निपातसंज्ञायां स्वरादिनिपातमव्ययम् इति अव्ययसंज्ञायाञ्च सत्यां' ''अव्यायादाप्सुप'' इति सुपो लोप स्यात् किल तथा सति पूर्वोक्तप्रयोगयोः चकारोपरि अम्प्रत्ययः कथं श्रूयते इति अस्याः शङ्कायाः समाधानं-अत्र 'च' इत्यस्य असत्वे इति प्रतिषेधो भवतीति तेन निपातसंज्ञायामभावात् अव्ययसंज्ञापि न भवति तेन सुब्लोपो न प्राप्त एव। एवमपि 'च' इत्यस्य द्रव्यवाचित्वाभावात् निपातत्वं स्यादेव इति चेदुच्यते-वैयाकरणानां मते शब्दोऽपि द्रव्यमेव तेन 'च' इत्यपि द्रव्यमेव। तेन प्रकृते विद्यमानस्य 'च' इत्यस्य द्रव्यवाचित्वात् निपातत्वं न भवत्येव। 'च' इति शब्दः इति। शब्दस्य च गुणत्वात् द्रव्यत्वं कथं युज्यते इत्युक्तौ शब्दोऽपि द्रव्यमेव। तथाहि वाक्यपदीयम्– ''वस्तु उपलक्षणं यत्र यवं नाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः।।'' इति अत्र भेद्यत्वेन इत्यस्य विशेष्यत्वेन इत्यर्थः। तेन यस्मिन् शब्दे यद् विशेष्यं तद् द्रव्यमित्यर्थः। यथा गौरित्यत्र गौर्व्यक्तिः जातिः इत्यत्र सामान्यं शुक्लो गुण इति गुणः पाक इति क्रिया च। एवमेव चम्पठति प्रोपाभ्यामित्यादौ शब्दस्वरूप विशेष्यत्वात् द्रव्यमेव। तेन तस्यापि ('च' इत्यस्यादि) द्रव्यवाचित्वात् निपातसंज्ञा न भवतीति। निपातसंज्ञाया अभावे अव्ययसंज्ञापि तस्य न भवतीति। तेन सुब्लोपस्य प्राप्तिरेव नास्ति इति पूर्वोक्तप्रयोगाः सिध्यन्त्येव। अयमेव सर्वोऽपि विषयः जयकृष्णेन सम्यक् प्रत्यपादि।

**स्तोः श्चुना श्चुः**[8]

इदमपि सूत्रमनेन विशिष्टतया व्याख्यातम्। एतस्मात्पूर्वं यानि सन्धिकार्याणि उक्तानि तेषां सर्वेषामपि अव्यवहितस्येवेति पूर्वस्येवेति परस्येवेति वा तत्परिभाषो-पस्थित्या अर्थः दत्तः दीक्षितादिभिः। परन्तु अस्मिन् सूत्रे न तादृश्याः कस्याश्चित परिभाषायाः उपस्थितिर्भवति। अतः तेषां सर्वेषां सूत्राणामपेक्षया अस्य सूत्रस्य अवगमने बालानां क्लेशः भवत्येव। एतन्मनसि निधाय व्याख्यातायं स्पष्टतया एतत्सूत्रविवरणं कृतवान्। तथाहि स् च स्तुश्च अनयोः समाहारः स्तुः, तस्य स्तोः इति विग्रहः। अस्य समासस्य समाहारद्वन्द्वत्वात् ''स न पुंसकम्'' इति सूत्रेण तस्य नपुंसकत्वमेव स्यात् किल इत्युक्तौ 'सौत्रं पुंस्त्वम्' इति व्याख्यात्रा समाधत्तम्। इदमेव समाधानमितरैः व्याख्यातृभिरपि उक्तमिति अयं समाधानन्तरं वदति। यथा ''यद्वा स् सहितः तु इति मध्यमपदलोपि-समासो वा'' इति शाकपार्थिवादेः आकृतिगणत्वात् अत्र सहित पदस्य लोपःइति तदाशयः। अनयोः समाधानयोः द्वितीयमेव समाधानं युक्तमेव प्रतिभाति। द्वितीयसमाधाने स्वीकृते पुंस्त्वस्य सौत्रत्वं नापेक्षितमिति लाघवमस्ति। इदं समाधानं अनेनैव विशिष्योक्तम्। योग इत्यस्य अध्याहारलभ्यत्वात् अचीत्यादि पदाननुवृत्तेश्च तस्मिन् इत्यादि सूत्राणाम् अनुपस्थितत्वात् पूर्वस्यैवेति परस्यैवेति इति नियमो नास्ति। तथैव योगेति सामर्थ्यात् स्तुश्चोः अव्यवहितत्वं भवेदिति नियमो भवति। एवमेव ''शादि''ति ज्ञापकात् च

[6] अ. सू. सं. 1/1/52

[7] अ. सू. सं. 1/4/57

[8] अ. सू. सं. 8/4/40

स्थान्यादेशयोः यथासंख्यं भवति निमित्तनिमित्तिनोश्च यथासंख्य न भवतीति। एतत्सर्वं बालस्य अवगमने अवश्यं क्लेशाय भवति। अयं व्याख्याता तावत् बालक्लेशं सर्वं विज्ञाय एतं सर्वमपि अर्थं सूक्ष्मतः विवृणोति। यथा- ''सकारस्य शकारेण चवर्गेण च योगे शकारो भवति। तवर्गस्यापि शकारेण चवर्गेण च योगे चवर्गो भवति'' इति अयं व्याख्याता स्पष्टं एतत्सूत्रार्थं कृतवान्।

**''विप्रतिषेधे परं कार्यम्''**

एतत् सूत्रमपि सम्यक् व्याख्यातवान् अयम्। विपूर्वक षिधु शास्त्रे माङ्गल्ये च, षिद् गत्यामित्यस्मात् धातोर्वा घञ्-प्रत्यये सति निष्पन्नं रूपमिदम्। धातूनामनेकार्थत्वात् शास्त्राद्यर्थयोरपि अनयोः धात्वो द्योतक वीत्युपसर्गयोगात् परस्पर-विरोध इति अस्य 'विप्रतिषेध' इति पदस्य अर्थः अस्यां व्याख्यायामुक्तः। अत्र कार्यशब्दः न केवलं क्रिया परः किन्तु ''अर्हे कृत्यतृचोश्च'' इति सूत्रेण निष्पन्नः इति कार्यशब्दस्य कृत्यर्हम् इत्यर्थः। एवञ्च विप्रतिषेधे यत्कृत्यर्हं पर त वतीति अस्य सूत्रस्य अर्थः अनेन उक्तः। किं तत् कृत्यर्हम् इति आकांक्षायां लोके तुल्यबलयोरेव पुरुषयोः परस्पर विरोधो भवतीति शास्त्रेऽपि तुल्यबलयोरेव सूत्रयोः विरोधे सति परं यत् शास्त्रं तदेव भवतीति इत्यर्थः सम्पन्नः। शास्त्रयोः तुल्यबलत्वं किं इत्याकाक्षायां प्रत्येकं शास्त्रस्य यत् किञ्चित् लक्ष्यसिद्धिः प्रयोजनमिति यत्र क्वापि तत्तत् सूत्रं यत्किञ्चिल्लक्ष्यं साधुत्वेन बोधयति-तदेव तस्य बलमित्यर्थः। तथा च अन्यत्र चरितार्थयोः द्वयोः शास्त्रयोः एकस्मिन् लक्ष्ये प्रवृत्तियोग्यतायां सत्यां परमेव भवतीति सूत्रार्थः पर्यवसन्नः। अयमर्थः अस्यां व्याख्यायां स्फुटं प्रतीतः प्रसंगवसात् सकृद्गति-परिभाषा पुनः प्रसंगपरिभाषा च अत्रैव व्याख्याने साधिता। इदं व्याख्यानं बहुधा तत्त्वबोधिनीमनुकरोति। ये च विषयाः प्रकृतग्रन्थानुपयुक्ताः ते तु त्यक्ताः।

**अर्थवत्** - अर्थवदधातुर्, प्रत्ययः प्रातिपदिकम् इति सूत्रं बालमनोरमा प्रौढमनोर मा-तत्त्वबोधिनी इत्यादिभिः ग्रन्थैः सह समालोच्य निष्कृष्टतया अर्थविवरणेन व्याख्यातवान्। सूत्रार्थकथनावसरे या रीति अनुसार्या तया रीत्यैव व्याख्यां कुर्वन् अयं.. सूत्रार्थमुपवर्णितवान्। मध्ये जायमान संदेहान् अपि अयं निवारयति। यथा-अर्थः अस्य अस्ति इति अर्थवत् इति नपंसकलिंगशब्दः। एवं अधातुः अप्रत्ययः इति धातुभिन्न प्रत्ययभिन्न इत्यर्थेन धातुप्रत्ययोः पुल्लिंगत्वात् अर्थवत् इत्यपि पुंल्लिङ्गे भवेत् यतः अर्थवतः अधातुः अप्रत्ययेऽन्वयात् इति शङ्का जायते तत् समाधानत्वेन व्याख्यायामुक्तं यथा- ''अर्थवत् इति नपुंसकलिंगनिर्देशः शब्दस्वरूपापेक्षया। अधातुः अप्रत्यय इति, पुल्लिंगनिर्देशस्तु 'परवल्लिङ्गद्वन्द्वतत्पुरुषयोः' इति उत्तरपदलिङ्गत्वात् बोध्य इत्याहुः'' इति। एवमेव अधातु अप्रत्यय इत्यत्र नञ्सत्वात् नञैवयुक्तन्यायेन यथा धातुः प्रत्ययोर्वा अर्थवान् तद्वत् तद्भिन्नोऽपि अर्थवान् गृह्यते इति सूत्रे अर्थवत् इति पदं नावश्यकमिति शङ्कायां सत्यां अर्थवत्वाभावे धनं, वनं इत्यादिषु प्रत्येकं वर्णस्य प्रातिपदिकसञ्ज्ञा स्यात् तथा सति प्रत्येकं वर्णात् अपि स्वादयः स्युः। अतः अर्थवत् इति पदं आवश्यकम्। एवमपि अत्र प्रतिपदिकसंज्ञायां सत्यामपि कर्मादिप्रतीतिः नास्ति इति हेतो अत्र स्वादयः न भवन्त्येव। अतः अस्मिन् सूत्रे अर्थवत् इति अभावेऽपि न क्षति इत्युक्तौ एवं वक्तुं न शक्यते यतः कर्माद्यभावेऽपि सु भवत्येव तथाहि भाष्ये 'द्वयेकयोः द्विवचनैकवचनं' 'बहुषु बहुवचनम्' इति सूत्रे प्रत्याख्याया एकवचनमिति न्यासः कृतः। तस्मिन्पक्षे प्रत्येकमपि प्रातिपदिकात्। कर्मादिसत्त्वे असत्त्वे वा एकवचनप्रत्ययः सुः भवत्येव इति सिद्धान्तितम्। अस्मिँश्च पक्षे धनादिषु शब्देषु प्रत्येकम् अवयवस्य धकारादेः प्रातिपदिकसञ्ज्ञा भवतीति प्रथमैकवचन प्रत्यय सुः स्यादेव। तस्मिन्सति जस्त्वादिकार्यापत्तिः। अतः सूत्रे अर्थवत् इति पदमावश्यकमेव इति अस्यां व्याख्यायां नूतनः कश्चन-विचारः प्रस्तुतः ततः परं अयं व्याख्याता यद्यपि इत्यारभ्य अर्थवत् परं प्रकृतसूत्रे नावश्यकमिति प्रतिपाद्य कृत्तद्धिते इति सूत्रे तद् आवश्यकम् इति स्पष्टप्रतिपत्तये इहैव कृतम् इति पक्षान्तरमपि दर्शयति। एतच्च सूत्रं बालमनोरमादिव्याख्याः सर्वाः समाकलय्य बृहत्कायत्वेन अनेन व्याख्यातम्।

**पति समास एव**[9] - समासे एव पतिशब्दः घिसंज्ञको भवतीति अस्य सूत्रस्य अर्थः। एतत् सूत्रार्थोऽपि अनेन जयकृष्णभट्टेन सम्यक् विवेचितः। अत्र समासे इति पतिशब्दापेक्षया अधिकरणे सप्तमी तेन समासे पूर्वपदत्वेन उत्तरपदत्वेन वा यत्र पतिशब्दो वर्तते स पतिशब्दः घिसंज्ञको भवतीति अर्थः लभ्यते। तेन पतिश्च गृहञ्च इत्यनयोः द्वन्द्वे पति इत्यस्य ''द्वन्द्वे घि'' इति सूत्रेण अस्य पति इत्यस्य घिसंज्ञकत्वात् पूर्वनिपाते सति पतिगृहे इति रूपं सिद्ध्यति अन्यथा गृहशब्दस्य पूर्वनिपातः स्यात्। पतिशब्दान्तस्य समासे इत्येव घिसंज्ञा भवतीति इत्यर्थे स्वीकृते सति भूपतये इत्यादौ एव पतिशब्दस्य उत्तरपदत्त्वात् घिसंज्ञा, सिद्ध्यति। न इतरत्र। अयं विषयः न केनापि व्याख्यातः न स्पृष्टः। एवमेव ''शेषोघ्यसखि''[10] इत्यनेनैव पतिशब्दस्यपि घिसंज्ञायां प्राप्तायां 'पति समासे' इति वचनं नियमार्थं भविष्यतीति एवकारः नापेक्षित इति शङ्कायां व्याख्याता समाधत्ते यथा- ''एवकार-करणम् इष्टतोऽवधारणार्थम् अन्यथा समासे पतिरेवेति, नियमः संभाव्येत'' इति। अस्या अयमाशयः एवकाराभावे पतिशब्दस्यापि पूर्वेणैव समासंज्ञायां सिद्धायां एतत् सूत्रारम्भात् समासे एव पतिशब्दः इत्संज्ञो भवति इतिवत् समासे पतिरेव घिसंज्ञो भवतीत्यपि नियमो भवितुमर्हति इति विनिगमनाविरहात् द्वितीयपक्ष एव कुतो न आश्रयितुं शक्यः? इति शङ्कातदवस्थैव भवति। तथा सति महाकविशब्दस्य समासत्वात् कवि शब्दस्य पृथक्घिसंज्ञायां सत्यामपि ''पतिशब्द एव समासे घिसंज्ञो भवतीति उक्तत्वात् महाकविशब्दस्य समासत्वात् ह्रस्वेकारान्तस्यापि तस्य घिसंज्ञा न स्यात्। तथा सति आङो नास्त्रियामिति सूत्रेण विहितः नाभावः घिसंज्ञोद्देश्यकः इति हेतो घिसंज्ञा अभावात् तत्प्रयुक्त नाभावोऽपि न भवेत्। तेन महाकविना इत्यादि प्रयोगाः असाधवः स्युः। अतः सूत्रे एवकारकरणमावश्यकम्। तस्मिन् सति पतिशब्दः समासे एव घिसंज्ञो भवति इत्येव नियमः, न तु समासे पतिशब्द एवेति विपरीत नियमः। तेन महाकविशब्दानामपि घिसंज्ञा सिद्ध्यति ततः तत्र युक्त नाभावोऽपि भविष्यतीति महाकविना इत्यादिनां साधुत्वमपि सेत्स्यति। यद्यपि ''धात्वादेः षः सः'' इति पाणिनीय-निर्देशेन अर्थात् धातु इति उकारान्तस्य शब्दस्य घिसंज्ञायां सत्यामपि धात्वादीत्यस्य शब्दस्य

[9] अ. सू. सं. 1/4/8

[10] अ. सू. सं. 1/4/7

समासत्वात् द्वितीयपक्षाश्रयणेन घिसंज्ञाया: अभावात् ''द्वन्द्वे घि'' इत्यनेन पूर्वनिपातो न स्यात् किन्तु पाणिनिना पूर्वनिपात: कृत: इति हेतो: समासघटकस्य पतिभिन्नस्यापि घिसंज्ञा भवतीति पाणिनीयनिर्देशेन ज्ञायते। अत: एवकाराभावेऽपि न दोष: इत्युक्तौ एवकाराभावे पूर्वोक्तज्ञापकाद्याश्रयणरूपज्ञानगौरवं भवति। अत: एवकार आवश्यक:। एवकारे सति साक्षात् सूत्रत: एव विवक्षितार्थ: सिद्ध्यतीति ज्ञापकाद्याश्रयणक्लेश: नास्ति इति ज्ञानलाघवं वर्तते अत: एवकार: आवश्यक:। एवं प्रकारेण अस्यां व्याख्यायां बहुविधोत्पत्ति: इतरव्याख्याभि: सह सूत्रमिदं व्याख्यातम् ग्रन्थकारेण।

''तृतीयादिषु भाषितपुंस्कपुंवद्गालवस्य''[11]

इति सूत्रमपि सप्रसंगं प्रत्येकं दलसार्थक्यानुगुणं व्याख्यातवान्। अत्र सूत्रे 'एकोऽचि विभक्तौ' इति सूत्रात् अचि इत्यनुवर्त्तते। तच्च तृतीयादिषु इत्यत्र अन्वेति। तृतीयाया: विभक्तित्वेन तृतीयादिषु विभक्तिषु इत्यर्थ: लभ्यते। उभयोरपि सप्तम्यन्तत्वात् यस्मिन्विधिस्तदादावल्ग्रहणे इति परिभाषया। तृतीयादिषु अजादिषु इत्यर्थ: लभ्यते। गालवग्रहणं विकल्पार्थं तेन गालवाचार्य मते भवति अन्यस्मिन् पाणिनीय मते न भवति इत्यर्थ: लभ्यते। किं भवति इत्याकाक्षायां प्रकृतसूत्रविहितं पुंवत्त्वं विशेषणतया अन्वेति। तेन अजादिषु तृतीयादिषु विभक्तिषु परेषु भाषितपुंस्कं विकल्पेन पुंवद् भवति इत्यर्थ: लभ्यते। अत्र भासितपुंस्कशब्दस्य भाषित: पुमान येन स: इत्यर्थ: स्वीक्रियते तर्हि पीलुने इत्यादिषु अपि पुंवत्त्वं स्यात्। तस्यापि पीलुशब्दस्य भाषितपुंस्कत्वात्। अत: अत्र विद्यमानभाषितपुंस्कशब्दस्य भाषित: पुमान् अस्मिन् अर्थ: तत् भाषितपुंस्कं इति विग्रह: स्वीकर्तव्य:। अन्यपदार्थ: अर्थ:। अत्र अर्थशब्देन प्रवृत्तिनिमित्तं स्वीक्रियते। तेन यत्र प्रवृतिनिमित्त ऐवायं भवति तदेव भाषितपुंस्कं पुंवद्भवतीति विवक्षितार्थ: सिद्ध्यति। एवमुक्ते एव पूर्वोक्तदोष परिह्रियते। यथा- पीलुशब्द: वृक्षवाची पुंल्लिङ्गे भवति फलवाची नपुंसकलिङ्गे भवति। पीलुशब्द: एव यद्यपि उभयो: पुंनपुसक-लिंगयो: प्रयुक्तो भवति तथापि वृक्षवाचिन: पीलुशब्दस्य प्रवृत्तिनिमित्तमन्यत्। फलवाचिन: पीलुशब्दस्य प्रवृत्तिनिमित्तमन्यत्। अत: उभयो: प्रवृत्तिनिमित्तैक्याभावात् प्रकृतसूत्रप्रयुक्त: पुंव ावो न भवति। अनादये अनादिने इत्यत्र प्रवृत्तिनिमित्तैक्यं वर्तत इति पुंवत्वं भवत्येव। तथाहि न विद्यते आदि यस्य तत् अनादि। अन्यपदार्थ: कुलादि। न विद्यते आदि यस्य स: स अनादि, अन्य पदार्थ: नारायण:। अत्र अनादिशब्दस्य पुंवत्वं भवत्येव। उभयत्रापि विद्यमानस्य अनादिशब्दस्य उत्पत्तिनाशरहित-प्रवृत्तिनिमित्तैक्यात्। पूर्वोक्त: विषय: सर्वोऽपि अस्यां व्याख्यायां सुस्पष्ट:। अयमेव विषय: मध्यसिद्धान्तकौमुद्यां विशेषतया कारिकारूपेण वर्णित: यथा-

यन्निमित्तमुपादाय पुंसिशब्द: प्रवर्तते।
क्लीबवृत्तौ तदेव स्यादुक्तपुंस्कं तदुच्यते।।

अस्या: कारिकाया अपि अयं जयकृष्णभट्ट: व्याख्यानं अकार्षीत। यथा- यदेव अनादित्वनिमित्तं तमुपादाय अनादिशब्दोऽनादिर्नारायण इति पुंल्लिङ्गे प्रवर्त्तते तदेवानादित्वमुपादाय अनादिकुलमिति नपुंसकेऽपीत्यनादिशब्दो भाषितपुंस्क: इति। अस्या: व्याख्याया: पठनेन यत्र अनादित्वं समानं भवति तत्र पुंवत्वं भवति यत्र समानं न भवति तत्र पुंवत्वं न भवति इति प्रतीयते तेन साजात्यात् पीलुने इत्यादावपि पीलुत्वं फलत्वव्याप्यजातिर्भवति इति, अत्र न पुंवत्वं। पुंसिविद्यमान पीलुशब्दस्य' वृक्षत्व-व्याप्यजातिर्भवति प्रवृत्तिनिमित्तभेदात्।

मातृकाया: पूर्णतया परिशीलनेन एतद् विज्ञायते यत् मातृकेयं स्वयं ग्रन्थकर्त्रा न विलिखिता अपितु केनचित् लेखयिता वर्ण मात्रा- सन्धीत्यादिषु दोषकरणात्। उदाहरणार्थम्-

**माहेश्वरसूत्रेषु**

ए ओङ् स्थाने ए उ ङ् इति
ऐ औ च् स्थाने ऐ ऊ च् इति
झ भ ञ् स्थाने ज भ ञ् इति
घ ढ ध ष् स्थाने घ ड ध प् इति।

अपि च ''अनुस्वारस्य ययि परसवर्ण:'' इति सूत्रद्वारा प्रवृत्तपरसवर्णसन्धे: सर्वत्राभाव: द्रष्टुं शक्यतेऽस्यां मातृकायाम्।

अल्पप्राण महाप्राण-भेदोऽपि (टकार-ठकारयो: भेद:) न विज्ञात: लेखकेनेति मातृकापरिशीलनेन ज्ञायते यथा –

प्रष्ठौह: इति शब्दव्याख्यानसमये पृष्ठं वहतीति वक्तव्ये पृष्टं वहतीति कथयति। एवमनेकेषु स्थलेषु द्रष्टुं शक्यते। एवञ्च षष्ठी स्थाने योगा इत्यस्य स्थाने षष्ठी इत्युक्तम्।

**उपयुक्त सन्दर्भ ग्रन्थ सूची**


1. ँअष्टाध्यायीकाशिकावृत्ति:, चौखम्भासंस्कृतप्रतिष्ठान, दिल्ली।
2. काशिकावृत्तिन्यासपदमञ्जरीयुता - षट् भागा: प्राच्यभारती प्रकाशनम्, वाराणसी, 1956-66।
3. काशिकावृत्तिसिद्धान्तकौमुद्यो: तुलनात्मकमध्ययनम्, डॉ. मोहनदत्त शर्मा, पूना, 1974।
4. प्रक्रियाकौमुदी (प्र.कौ.), के.पि. त्रिवेदिना सम्पादिता, मुम्बई, 1925।
5. प्रौढ़मनोरमा, श्रीभट्टोजिदीक्षित:, चौखम्भा कृष्णदास अकादमी, वाराणसी, संस्कण: पुनर्मुद्रित, वि.सं. 2064।
6. प्रौढ़मनोरमा शब्दरत्न - भैरवी - भावप्रकाशसरलोपेता, चौखम्भा, वाराणसी।
7. मध्यसिद्धान्तकौमुदी, वरदराजाचार्य: 1650।
8. 'मध्यसिद्धान्तकौमुदी' मध्यमनोरमा - मध्यमनोरमापूरणी संस्कृत - हिन्दी व्याख्याद्वयोपेता, डॉ. अर्कनाथ चौधरी, जगदीश संस्कृत पुस्तकालय, जयपुर, प्र. सं., 1995।
9. 'मध्यसिद्धान्तकौमुदी' 'सुबोधिनी' संस्कृत-हिन्दीव्याख्योपेता, डॉ. सुरेशचन्द्र शर्मा, चौखम्बा सुरभारती प्रकाशन वाराणसी, प्रथम संस्करण, 1999 ई.।


[11] अ. सू. सं. 7/1/74

10. 'मध्यसिद्धान्तकौमुदी' 'लक्ष्मी' 'मुद्रिका' संस्कृत-हिन्दी व्याख्योपेता, पं. हरेकान्त मिश्रः, चौखम्भा पब्लिशर्स, वाराणसी, प्र. सं., 2007।
11. 'मध्यसिद्धान्तकौमुदी' प्राभाकरीटीका सहिता, डॉ. प्रभाकरमिश्रः, अरविन्दमकरन्दप्रकाशन, वाराणसी, प्र. सं., 1989।
12. 'मध्यसिद्धान्तकौमुदी' प्रभाकरी-विवृति सहिता, श्री विश्वनाथशास्त्री प्रभाकर मोतीलाल बनारसीदास, वाराणसी, प्र. सं., 1975।
13. 'मध्यसिद्धान्तकौमुदी' सीता-सावित्री संस्कृत-हिन्दी व्याख्याद्वयोपेता, श्री कालिकान्त झा, कृष्णदास अकादमी, वाराणसी, 1986।
14. 'मध्यसिद्धान्तकौमुदी' डॉ. हरस्वरूप वशिष्ट, 2005।
15. महाभाष्यम् (म.भा.) भारतीयाद्यिशासन संरक्षकतायां प्रकाशितम् भागत्रयात्मकम्, मोतीलाल बनारसीदास, 1967।
16. लघुशब्देन्दुशेखरः नागेशभट्टः चौखम्भा पब्लिशर्स, वाराणसी, संस्करण, 2004।
17. लघुशब्देन्दुशेखरः पञ्चसन्ध्यन्तम्, आचार्यः श्रीपादसत्यनारायणमूर्तिः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, 2008।
18. वैयाकरणसिद्धान्तकौमुदी 'बालमनोरमा' दीपिका संस्कृत-हिन्दी व्याख्यापेतम्, श्रीगोपालदत्तपाण्डेयः, चौखम्बा सुरभारती प्रकाशन, वाराणसी, पुनर्मुद्रितसंस्करण, 2007।
19. वैयाकरणसिद्धान्तकौमुदी चौखम्भा पब्लिशर्स, वाराणसी, 2004।
20. वाक्यपदीयम् प्रथमकाण्डः, हरिवृषभटीका (वा.प.) डक्कन कॉलेज, पूना, 1966।
21. वाक्यपदीय ब्रह्मकाण्डम्, हरिवृषभ अम्बाकर्त्री टीकाद्वयोपेता, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
22. शब्दकौस्तुभः, प्रथमभागः, चौखम्भा, 1929।
23. शब्दकौस्तुभः, द्वितीयभागः, चौखम्भा, 1929।
24. सिद्धान्तकौमुदी तत्त्वबोधिन्या सह, (सि.कौ.त.) निर्णयसागरप्रकाशनम्, मुम्बई, 1936।
25. सिद्धान्तकौमुदी, बालमनोरमातत्त्वबोधिनीयुता (सि.कौ.बा.त.) मोतीलाल बनारसीदास, दिल्ली, 1964।
26. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, प्र.सं. 2007 (संवत्)।
27. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, द्वि.यं. 2020 (संवत्)।
28. संस्कृत व्याकरण का इतिहास, युधिष्ठर मीमांसक, तृ.यं. 2030 (संवत्)।
29. New Catalogus Catalogurum (NCC)